QP Code: CBN-01

# कर्नाटकसंस्कृतविश्वविद्यालयः

## सर्टिफिकेट्-परीक्षाः - २०२५

## भर्तृहरिनीतिशतकम्

### पत्रिका -१, विषयः - व्याकरणम्

**Total No. of Questions: 49** | **Total No. Of Printed Pages: 4**

**Date: 16.11.2025** | **Time: 10.30 A.M to 1.00 P.M** | **Max Marks: 80**

**I. समीचीनम् उत्तरं चित्वा लिखत ।** 40x1=40

१. बोद्धारः इति पदस्य एतत् अस्ति

अ) एकवचनम् आ) द्विवचनम् इ) बहुवचनम् ई) सर्ववचनम्

२. नरास्थि अत्र एषः सन्धिः अस्ति

अ) गुण आ) सवर्ण इ) यण् ई) वृद्धि

३. प्रीतिः इति पदम् एतस्मिन् लिङ्गे अस्ति

अ) स्त्रीलिङ्गे आ) पुल्लिङ्गे इ) नपुंसकलिङ्गे ई) मालिङ्गे

४. द्विपः इति पदस्य एषः अर्थः अस्ति ।

अ) द्विजः आ) गजः इ) सर्पः ई) द्वीपः

५. 'महताम्' इति पदस्य एषा विभक्तिः अस्ति ।

अ) प्रथमा आ) द्वितीया इ) षष्ठी ई) सप्तमी

६. सह् + तुमुन् एतत् रूपं सिध्यति ।

अ) सहितुम् आ) सहिढुम् इ) सहीतुम् ई) सोढुम्

७. एतेषु पदेषु कृदन्ताव्ययम् एतत् ।

अ) च आ) अपि इ) गन्तुम् ई) गता

८. देहिना इति पदस्य प्रातिपदिकम् एवं भवति ।

अ) देहि आ) देहिन् इ) देहः ई) देहिनी

९. प्रारभ्यते इति पदम् एतस्मिन् प्रयोगे भवति ।

अ) कर्मणि आ) कर्तरि इ) भावे ई) सर्वप्रयोगे

१०. शानच् प्रत्ययस्य उदाहरणम् एतत् ।

अ) सम्मानः आ) हन्यमानः इ) दृष्टानि ई) दीयते

११. प्रारब्धम् इति पदे एषः प्रत्ययः अस्ति ।

अ) क्तवतु आ) तव्यत् इ) क्त ई) अनीयर्

१२. दिक्षु इति पदम् एतस्मिन् लिङ्गे अस्ति ।

अ) शिवलिङ्गे आ) पुल्लिङ्गे इ) नपुंसकलिङ्गे ई) स्त्रीलिङ्गे

१३. सत्सङ्गतिः अस्य विग्रहवाक्यम् एवं भवति ।

अ) सत्सस्य सङ्गतिः आ) सन्तः सङ्गतिः इ) सतां सङ्गतिः ई) सद्भ्यः सङ्गतिः

१४. कथय इति पदम् एतस्मिन् पुरुषे अस्ति ।

अ) प्रथमे आ) मध्यमे इ) उत्तमे ई) अन्यपुरुषे

१५. वाक् – प्रथमा, सप्तमी - _________

अ) वाचि आ) वाकि इ) वाके ई) वाचे

१६. जडस्य भावः एवं भावे

अ) जेड्यम् आ) जाड्यम् इ) जाडम् ई) जीड्चम्

१७. वृद्धिसन्धेः उदाहरणम् एतत्

अ) नर्तक्यौ आ) नद्यौ इ) अत्यधिकम् ई) नास्त्यौषधम्

१८. पूर्वरूपसन्धेः उदाहरणम् एतत्

अ) परमानन्दः आ) मातुरिच्छा इ) अधोऽधः ई) विद्युच्छक्तिः

१९. निर्गतम् आमिषं यस्मात् तत्

अ) निरामिषा आ) निरामिषम् इ) निरामिषः ई) निरमीशा

२०. रच् + तुमुन् = _________

अ) रचयितुम् आ) रचितुम् इ) रोचयितुम् ई) रचेतुम्

२१. उद्धरेत् इति पदम् अस्मिन् लकारे अस्ति ।

अ) लृट् आ) लट् इ) लिङ् ई) लोट्

२२. कुप्यति इत्यस्य णिजन्तं रूपम् एवं भवति ।

अ) कुप्ययति आ) कोपयति इ) कापयति ई) कूपयति

२३. धनैर्विद्या अस्य पदविभागः एवं भवति ।

अ) धनैविदि + या आ) धनैः + विद्या इ) धनैर् + विद्या ई) धन + ऐर्विद्या

२४. एतत् क्रियापदम् एकवचने अस्ति ।

अ) हसन्ति आ) वदन्ति इ) हन्ति ई) ददाति

२५. ताः सश्रद्धं श्रृण्वन्ति । रेखाङ्कितपदस्य प्रश्नः एवं भवति ।

अ) कुत्र आ) कति इ) कदा ई) कथम्

२६. उपासनम् इत्यत्र अयं प्रत्ययः अस्ति ।

अ) णमुल् आ) णिच् इ) ल्युट् ई) ल्यप्

२७. लभ् + त्त्वा – रूपम् एवं भवति ।

अ) लभित्वा आ) लभ्द्वा इ) लभत्वा ई) लब्ध्वा

२८. विहीनः इति पदस्य प्रयोगे एषा विभक्तिः भवति ।

अ) प्रथमा आ) द्वितीया इ) तृतीया ई) चतुर्थी

२९. अनिष्टुप् छन्दसि प्रतिपादम् एतावन्ति अक्षराणि भवन्ति।

अ) पञ्च आ) षट् इ) सप्त ई) अष्ट

३०. शर्वस्य इदम्

अ) शर्वाम् आ) शर्वरम् इ) शार्वम् ई) शरिवम्

३१. ज्ञातम् इति अर्थं बोधयति इदं पदम्।

अ) अपगतम् आ) आगतम् इ) आगतम् ई) अवगतम्

३२. तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः' अस्य छन्दः एतत्

अ) अनुष्टुप् आ) शिखरिणी इ) इन्द्रवज्रा ई) शार्दूलविक्रीडितम्

३३. SSS एतानि चिह्नानि एतस्मिन् गणे भवन्ति।

अ) मगणः आ) यगणः इ) तगणः ई) रगणः

३४. श्वा इति पदम् एतदन्तम् अस्ति।

अ) आकारान्तम् आ) वाकारान्तम् इ) नकारानतम् ई) शकारान्तम्

३५. द्वावेव इति पदस्य सन्धिविभागः एवं भवितुम् अर्हति।

अ) द्वा+वेव आ) द्वौ+एव इ) द्वे+एवेव ई) द्वा+एव

३६. आपन्नः इति पदस्य प्रत्ययः एषः अस्ति।

अ) क्तवतु आ) क्त इ) अनीयर् ई) तव्यत्

३७. णिनिप्रत्ययः अस्मिन् पदे अस्ति।

अ) आचार्याणी आ) केसरी इ) नदी ई) वाणी

३८. नमो योगे अस्याः विभक्तेः प्रयोगः भवति।

अ) प्रथमा आ) द्वितीया इ) तृतीया ई) चतुर्थी

३९. कृत्+क्तिन=__________

अ) कृतिः आ) कर्तिः इ) कृक्तिः ई) कीर्तिः

४०. कृशधनः इत्यस्य समासः एषः भवति।

अ) तत्पुरुषः आ) बहुव्रीहिः इ) द्वन्द्वः ई) द्विगुः

**II. एतेषु चतुर्णां सुभाषितानाम् आकांक्षां लिखत।** **4x5=20**

१. प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजाना न परित्यजन्ति॥

२. बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥

३. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नं गुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः।

४. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वग्भूषणं भूषणम्॥

५. शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौशधम्॥

६. साहित्यसङ्गीतकलविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः तद्भगधेयं परमं पशूनाम् ॥

**III. प्रश्नद्वयस्य उत्तरं संस्कृतेन लिखत।** **2x10=20**

१. सर्वेषां मनः तोषयितुं न शक्यते' अतः मनसि यदुचितमिति भासते तदेव करणीय्म् इति नीतिबोधक- कथां लिखत।

२. भगीरथकथाद्वारा; प्रारब्धमुत्तमजना न परित्यजन्ति इति समर्थयत।

३. सत्सङ्गतिः कथय किं न करोति पुंसाम् इति उक्तिः स्वजीवने सत्या इति निरूपयन्तु निजजीवनघटनया।

* * * * *